-ग्रं श्री १४[illegible]

संस्कृत

स्तोत्र

काशीविश्वेश्वरस्तोत्र

३७८ | स्तो २५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीसांब॥ शंभो शंकर धूर्जटे। सांब सदाशिव धूर्जटे॥ उपदिश तारकमद्येय। कालचिलंबोनविधेय॥ १॥ शंभो शंकर गौरीशं वंदे गंगाधरमीशं॥ रुद्र पशुपतिमीशं तं कलये काशीपुरनाथं॥ २॥ हरहरसाशिवशिवा विश्वेशा त्वं शरणं। विश्वनाथा त्वं शरणं॥ भालेलोचना परमानंदा नीलकंठा त्वं शरणं॥ ३॥ गौरीशा त्वं शरणं। गौरीनाथा त्वं शरणं। नंदिवाहना नागभूषणा त्वं ईश्वरा त्वं शरणं॥ ४॥ वीरेशा त्वं शरणं। वीरविक्रमा त्वं शरणं॥ विधुवद्भाविषमविलोचना विशालभाला त्वं॰॥ ५॥ भूतेशा त्वं शरणं। भूतिदायका त्वं शरणं। भवभयमोचन भीमपराक्रम भुजंगभूषा त्वं॰॥ ६॥ पतितपावना त्वं शरणं। पतितोध्धरणा त्वं शरणं। परात्परा पार्वतीप्रियापुराणपुरुषा त्वं॰॥ ७॥ करुणानिधे त्वं शरणं। करुणासागर त्वं शरणं।

कामविदाहिन्कलिमलनाशिन्कपालमालिन्त्वं॰॥८॥निजा
नंददात्वंशरणं।निजपददायकत्वंशरणं।निस्पानिरंजननिरुपम
लोचननिखिलानंददात्वं॰॥९॥मायाहीनात्वंशरणं।माया
तारकत्वंशरणं।मायाजलनिधिमग्नंमांकीत्यापालयत्वं
शरणं॥१०॥नमःशिवायसांगायसगणायससूनवे॥स
नंदिनेसगंगायसरुपायनमोनमः॥११॥ ॥इतिश्रीम
छंकराचार्यविरचितकाशीविश्वेश्वरस्तोत्रंसंपूर्णं॥ ॥
॥श्रीराम॥रत्नैःकल्पितमासनंहिमजलैःस्नानंचदिव्यां
बरंनानारत्नविभूषणंमृगमदामोदांकितंचंदनं॥जातीचं
पकबिल्वपत्रसहितंपुष्पंचधूपंतथादीपंदेवदयानिधेपशु
पतेहृत्कल्पितंगृह्यतां॥१॥सौवर्णेनवरत्नखंडरचितेपा
त्रेघृतंपायसंभक्ष्यंपंचविधंपयोदधियुतंरंभाफलंपानसं॥

शाकानामयुतंजलंरुचिकरंकर्पूरखंडान्वितंतांबूलंमनसा
मयाविरचितांपूजांगृहाणप्रभो ॥ २ ॥ छत्रंचामरयोर्युगंव्य
जनकंचादर्शकंनिर्मलंवीणाभेरिमृदंगकाहलकलागीतंच
नृत्यंतथा ॥ साष्टांगंप्रणतिःस्तुतिर्बहुविधाएतत्समस्तंम
यासंकल्पेनसमर्पितंतवविभोभक्त्यागृहाणप्रभो ॥ ३ ॥
आत्मात्वंगिरिजामतिःसहचराःप्राणाःशरीरंगृहंपूजा
तेविषयोगभोगरचनानिद्रासमाधिस्थितिः ॥ संचारःप
दयोःप्रदक्षिणविधिःस्तोत्राणिसर्वागिरोयद्यत्कर्मकरो
मितत्तदखिलंशंभोतवाराधनम् ॥ ४ ॥ करचरणकृतंवा
कायजंकर्मजंवाश्रवणमननजंवामानसंवापराधं ॥ विहितम
विहितंवासर्वमेतत्क्षमस्वजयजयकरुणाब्धेश्रीमहादेवशंभो
॥ ५ ॥ इतिश्रीमच्छंकराचार्यविरचितामानसपूजासमाप्ता ॥

महादेवमहादेवमहादेवेतियोवदेत्॥ एकेनैवभवेन्मोक्षोह्या
ध्यंशंभुरूणीभवेत्॥ १॥ शिवशिवेतिशिवेतिशिवेतिवा
भवभवेतिभवेतिभवेतिभवेतिवा॥ हरहरेतिहरेतिहरेति
वाभजमनः शिवमेनिरंतरं भजमनः शिवमेनिरंतरं॥ २॥

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com